SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-3, (Jul-Sep) 2025

# नाट्योत्पत्तौ वेदस्य भूमिका

## Nāṭyotpattau vedasya bhūmikā

**Nayanmani Roy**
Ph.D Scholar, Burdwan University,
Burdwan, West Bengal, India
Email: nayanmani94roy@gmail.com

**Abstract:** नाटकमेव मनोरञ्जनस्य सर्वोत्कृष्टसाधनम्। नाट्यस्य मनोरञ्जकतासम्पर्के नाट्यशास्त्रस्य प्रथमाध्याये उल्लिख्यते विनोदजननं लोके नाट्यमेतद् भविष्यति। सर्वकाले सर्वस्थाने नाटकमेव सर्वलोकप्रियरूपेण विराजते। नाट्यगृहे तथा अधुना चलचित्रगृहे दर्शकाः दृश्यन्ते। मालविकाग्निमित्रम् नाटकस्य प्रथमाङ्के चतुर्थश्लोके कालिदासेन उक्तम् –

"देवानामिदमामनन्ति मुनयः शान्तं क्रतुं चाक्षुषं
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तिकं द्विधा।
त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य वहुधाप्येकं समाराधनम्"॥

नाटकस्य उत्पत्तिविषये अभिनयदर्पणे नन्दिकेश्वरमहोदयेन उक्तं –

"नाट्यवेदं ददौ पूर्व्वं भरताय चतुर्म्मुखः।
ऋग्यजुः सामवेदेभ्यो वेदाच्चाथर्व्वणः क्रमात्।
पाठ्यं चाभिनयं गीतं रसान् संगृह्य पद्मजः"॥ (2,7,8)

नाटकस्य मूलबीजं प्राप्यते वेदे। शोधप्रबन्धेऽस्मिन् नाटकस्य उत्पत्तिविषये स्वल्पविस्तारेण आलोचना क्रियते।

**Keywords**: नाट्यवेदः, पञ्चमवेदः, अनुकरणम्, दासीकन्या, महाव्रतयागः।

न तत् ज्ञानं, शिल्पं, कर्म, न सा कला विद्या च यत् खलु न दृश्यते अस्मिन् नाटके। भरतमुनिना यत् नाट्यं सृज्यते तत्र शास्त्राणि, शिल्पाणि विविधकर्माणि समवेतरूपेण प्राप्यन्ते।

"न तज् ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
न स योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते॥
सर्वशास्त्राणि शिल्पानि कर्माणि विविधानि च।
अस्मिन्नाट्ये समेतानि तस्मादेतन्मया कृतम्"॥ [1]

ग्रीसे भारतवर्षे च नाटकं सभ्यतायाः प्रातःलग्ने जनचित्तरञ्जनाय उद्भूतम्। तत् परं नाटकस्य अप्रतिहतजययात्रा सहस्रवर्षं यावत् चलति। जीवनं विना साहित्यं अर्थहीनम्। नाट्ये जीवनस्य समस्या प्रतिफलिता। चरमतमउत्कण्ठायाः संकट-संघातयोः मुहूर्ते मनुष्यत्वस्य यो दीप्तिः

प्राप्यते, तस्याः अन्तर्निहितरूपस्य परिचयः प्राप्यते नाटके। John Gassner महोदयेन उच्यते— 'It (drama) represents humanity in moments of maximum tension, conflict and crisis'.[2]

नाटकं हि साहित्यस्य भिन्नभिन्नविभागात् प्रकृतौ लक्षणे च सम्पूर्णरुपेण स्वतन्त्रम्, नास्ति सन्देहः। किन्तु स्वातन्त्रं किम्,नाटकस्य धर्म लक्षणं किम्, संज्ञा का, - अस्माकं स्पष्टरूपेण धारणा नास्ति। येषां कृते नाटकस्य भिन्नभिन्नलक्षणानि वाह्याभ्यन्तरीणभेदेन सामान्यविशेषभेदेन विशिष्टता लभ्यते, तेषां काव्य-उपन्यासप्रभृतिः न मन्यते, नाट्यं ज्ञायते,अत्र नाटकस्य नाटकत्वम्। भरतमुनिना उक्तम्—

"तौर्य्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयम्"।[3]

अभिनयदर्पणे नन्दिकेश्वरेण उच्यते—

"नाट्यं तन्नाटकञ्चैव पूज्यं पूर्व्वकथायुतम्"॥[4]

पुनः नाट्यशास्त्रे दृश्यते—

"त्रैलकस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्।
नानाभावोपसंपन्नं नानावस्थान्तरान्तमक्
लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम्।।
दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्॥
विश्रामजननं लोके नाट्यमेतद्भविष्यति"॥[5]

नाटकं हीनविषयस्योपरि लिखति, किन्तु प्रयोगे यदि दीप्तिः उपस्थिता, रचनायाम् उपस्थापने च वैचित्र्यं प्राप्यते तर्हि नाट्यं शोभायुक्तं भविष्यति। नाट्यप्रयोगस्य दीप्तिः वैचित्र्यं यदि न प्राप्यते तर्हि उदात्तस्वरयुक्तनाट्यं दर्शकस्य मनोरञ्जनं न करोति। पञ्चमवेदरूपेण परिचितोऽयं नाट्यवेदः 'नाट्याख्यं पञ्चमं वेदं'[6]।

Thornton Wilder महोदयेन नाट्यलक्षणसम्पर्के वैशिष्टचतुष्टयं उल्लिख्यते Some thoughts on playwriting— Perspectives on Drama इति ग्रन्थात्।[7] नाट्योत्पत्तौ वेदस्य भूमिका का, नाटकस्य मूलवीजं वेदमध्ये अस्ति? अयं खलु अस्माकं विषयः।

अनुकरणं हि मनुष्यस्य सहजातप्रवृत्तिः। यदा एकः शिशुः जातः तदा स सर्वे खलु अनुकरणं करोति। अनुकरणप्रवृत्तेः वीजं शिशुनां अनुन्नतचेतनायां विद्यमानः अस्ति।अनुकरणप्रवृत्ति र्न केवलं जनानां मध्ये दृश्यते प्राणिकुलमध्ये अपि दृश्यते। अनुकरणप्रवृत्तेः उद्देश्यं खलु विनोदनम्। यदि एकः शिशुः गुरुजनानां कार्यम् अनुकरोति, तर्हि स आत्ममध्ये तृप्तिः अनुभूयते। कियत् क्षणमेव अस्माकं सुखं दुःखं न स्मरणीयम्, विनोदनमध्ये विचरणं कुर्वन्ति। धनञ्जयेन नाट्यसम्पर्के उक्तम् अवस्थानुकृतिर्नाट्यम्।

प्राचीनभारतस्य ऐतिहासिकविवरणात् सम्पूर्णरूपेण स्पष्टं भारतीयजनाः सङ्गीतप्रेमी। वैदिकयुगे नार्य्यः संगीते नृत्ये च कालम् अतिवाहितवत्यः।यज्ञानुष्ठाने संगीतस्य नृत्यस्य गुरुत्वम्

अस्ति। कृष्णयजुर्वेदे दृश्यते दासीगणैः नृत्यं गीतं च क्रियते[8]। वैदिककाले शैलुषजातिः आसीत्। शुक्लयजुर्वेदस्य वाजसनेयसंहितायां अस्य उल्लेखोऽस्ति—

'नृत्ताय सूतं गीताय शैलुषं धर्माय सभाचरं नरिष्ठाये।
भीमलं नर्माय रेभं हासाय कारिमानन्दाय स्त्रीषखं प्रमदे॥
कुमारीपुत्रं मेधायै रथकारं धैर्य्याय तक्षाणम्'॥[9]

अनेन श्लोकमाध्यमेन ज्ञायते शुक्लयजुर्वेदस्य काले नाटकस्य प्रारम्भिकरूपं अस्ति इति अनुमीयते। S. N. Dasgupta महोदयेन स्विक्रीयते वैदिककाले नाटकस्य रूपं वर्तमानो आसीत्- 'It seems, therefore, that even if the elements of the drama were present in the Vedic times, there is no proof that the dramas, in however rudimentary form, were actually known. The actor is not mentioned nor does any dramatic terminology occur. There may have been some connection between the dramatic religious ceremonies and the drama embryo'.[10]

ऋग्वेदस्य अनेकानि संवादसूक्तानि अवलोक्य Prof. McDonnell महोदयेन तस्य History of Sanskrit Literature ग्रन्थे उक्तं संवादाः भारतीयनाट्यसाहित्यस्य आद्यरूप एव।[11] नाटकमध्ये अनेकानि तत्त्वानि प्राप्यन्ते, किन्तु संवादस्य तथा अभिनयस्य विशेषो गुरुत्वमस्ति। संवादस्य तत्त्वम् ऋग्वेदे प्राप्यते एवं नाटकस्य वीजं ऋग्वेदे अस्ति इति मन्यते। ऋग्वेदस्य 10/10 संख्यके अस्ति यमयमि-संवादसूक्तम्। यमी यमं प्रेमस्वीकरणाय अनुरोधं करोतु—

"ओ चित्सखायं सख्या ववृत्यां तिरः पुरू चिदर्णवं जगन्वान्।
पितुर्नपातमा दधीत वेधा अधि क्षमि प्रतरं दीध्यानः"॥[12]

यमस्य उत्तरम्—

"न ते सखा सख्यं वष्ट्येतत्सलक्ष्मा यद्विषुरूपा भवाति।
महस्पुत्रासो असुरस्य वीरा दिवो धर्तार उर्विया परिख्यन्"॥[13]

ऋग्वेदस्य 10.95 संख्यके अस्ति पुरूरवा-उर्वशी, कुत्रापि पात्रत्रयम् अस्ति वार्तालापकरणाय, यथा 1.170 संख्यायाम् अगस्त्यः लोपामुद्रा एवं द्वयोः पुत्रयोः वार्तालापः प्राप्यते। इन्द्रः तस्य पत्नी इन्द्राणी पुत्रः वृषाकपिः त्रयस्य वादानुवादः क्लिष्टः। एवमेव इन्द्र-मरुत्-संवादः(1.65-70), सरमा-पणि-संवादः(10.108), विश्वामित्र-नदी-संवादः(3.33), वसिष्ठस्य आत्मपुत्रस्य संवादः(7.33)। विश्वामित्र-नदीसंवादस्य गुरुत्वम् अतीव महत्वपूर्णम्। ऋग्वेदे अयं वादानुवादः काव्यशैली च निर्दिष्टः। यः खलु परवर्तिवैदिकसाहित्ये लुप्तो भवति। संवाद-सूक्तानि खलु नाट्यसाहित्यस्य प्रथमरूपम्– मूल्यवानतथ्यमिदम् परवर्तियज्ञसाहित्ये(ritual literature) स्पष्टरूपेण न दृश्यते। Keith महोदयेन उक्तं— 'we must, therefore admit

that we have in these dialogues remnant of a style of poetry which died out in the Vedic period.'[14]

बालिकाः सोमरसनिर्माणसमये गायन्ति स्म, तस्य प्रमाणं ऋग्वेदे प्राप्यते[15]। वैदिकयुगे दासीकन्या एव उच्चनृत्यशिक्षा क्रियते 'चर्म्मोव भिन्दन्ति पाप्मानमे....'[16] । कौषीतकी ब्राह्मणे[17] उच्यते वैदिकसूक्तस्य मूलांशः खलु नृत्य-गीत-वाद्यानि। महाव्रतनामके[18] अनुष्ठाने दृश्यते एकस्मै चर्मणे वैश्यस्य शूद्रस्य च संग्रामः, अन्तिमे वैश्येन विजयो लभते। अस्मिन् रूपके नाट्यकला प्राप्यते। पुनः अस्मिन् प्रसङ्गे Keith महोदयेन उक्तम्– 'In this connection can also explained the use of a drum by the priest and of various musical instruments- a long list of names of these instruments is given made up of rare popular words- by women, whose presence and activity are characteristic of the popular character of the ritual.'[19]

अन्तिमे उपसंहारे प्राप्यते नाटकस्य बीजम् अवश्यमेव ऋग्वेदस्य संवादसूक्ते प्राप्यते, तस्मात् कारणात् आचार्यभरतस्य 'जग्राह पाठ्यमृग्वेदात्'[20] अस्मिन् श्लोके संकेतः प्राप्यते। ऋग्वेदस्य संवाद-सूक्ते नाटकस्य आदिरूपं न प्राप्यते, किन्तु स्पष्टरूपेण उच्यते संवादे नाटकस्य वीजमस्ति एव।

नाटकस्य अस्तित्वं खलु नास्ति, किन्तु वैदिकयुगे नृत्यं गीतं वाद्यं अनुकरणाभिनयः कथोपकखनप्रभृतयो दृश्यते। यः खलु क्रमान्वये परिवर्तनेन नाटकाभिनये परिणतो भवेत्। वैदिकयूगे अनेन उपादानमाध्यमेन नाट्योपादानस्य सूत्रम् अन्विष्यते इति वयं मन्यामहे।

## Endnotes

1. नाट्यशास्त्रम् , प्रथमोऽध्यायः श्लोकः 116,117
2. Master of Drama, John Gassner, preface pp. xvii, Dover Publication, New York.
3. अमरार्थ-चन्द्रिका, प्रथमकाण्डे, नाट्यवर्ग 388
4. अभिनयदर्पणम् 15
5. नाट्यशास्त्रम् , प्रथमोऽध्यायः श्लोकः 106, 111, 114
6. भरतनाट्यशास्त्रम् 1.15
7. (1) The theatre is an art which reposes. (2) It is addressed to the group mind. (3) It is based upon a pretense and its vert nature calls out a multiplications of pretenses. (4) Its action takes place in a perpetual present time. - -Nātyatattwa vicāra (Bengali Language) p.38
8. चर्म्मोव भिन्दन्ति पाप्मानमेवैषामव भिन्दन्ति माऽप रात्सीर्म्माहति व्यात्सीरित्याह सम्प्रत्येवैषां पाप्मानमव भिन्दन्त्युदकुम्भानाधिनिधाय दास्यो मार्ज्जालीयं परि नृत्यन्ति पदो निघ्नतीरिदम्मुधुं

गायन्त्यो मधु वै देवानां परममन्नाद्यं परममेवान्नाद्यमव रुन्धते पदो नि घ्नन्ति महीयामेवैषु दधति।।-- कृष्णयजुर्वेदः(तै.संहिता) 7/5/10

9. अध्याय 30, मन्त्र 6
10. History of Sanskrit Literature by S.N. Dasgupta and Dr. K.K. De – P. 46 -47
11. The earliest forms of dramatic literature in india are represented by those hymns of the Rigveda which contain dialogues, such as those of saramā Panis , Yama Yamī, Purūravas and Urvasī, the latter, indeed, being the foundation of a regular play composed much more than a thousand years later by the greatest dramatic of india. P- 346
12. ऋग्वेदः 10.10.1
13. ऋग्वेदः 10.10.2
14. Sanskrit Drama p. 15
15. ऋग्वेदः 9.66.8
16. कृष्णयजुर्वेदः(तै.संहिता) 7.5.10 ,
17. कौषीकति-ब्राह्मणम् 21.5
18. Sankhayana Aranyaka by Keith - page 78, Sanskrit Drama- page 24, काठक-संहिता 34.5
19. Sankhayana Aranyaka by Keith - page 78
20. भरतनाट्यशास्त्रम् 1.17

## Bibliography


- Amarsinha. *Amarkoṣaḥ*. ed. Gurunath Vidyanidhi, Sanskrit Pustak Bhandar, Kolkata,1408 Bangabda
- Bharat. *Natyaśāstram*.ed.with Bengali trans. Sureshcandra Bandyopadhyaya and Chanda Chakraborty, Nabapatra Prakashan, Kolkata,2014
- Dasgupta,S.N and De.S.K. *A History of Sanskrit Literature*, University of Calcutta,1977
- Gassner, John. *Masters of the Drama*. Dover Publication, New York,1940
- Keith,A.B. *The Sanskrit Drama*. Oxford University Press,1954(rpt.)
- Macdonell,A.A. *A History of Sanskrit Literature*,New York,D. Appleton and Company,1900
- Mukhopadhyaya, Durgasankar. *Nātyatattwa-bicāra*. Karuna Prakasani, Kolkata,2013(rpt)
- Nandikeswara. *Abhinayadarpaṇaḥ*. ed. Gourinath Sastri, bengali trans. Asoknath Sastri, Nabapatra Prakasan, Kolkata, 2012(rpt)
- *Ṛg Veda*(Vol.1-9). With Padapāṭha & Sāyaṇabhāṣya, ed. and Hindi translation by Pt. Ram Govind Trivedi, Chowkhamba Vidyabhawan, Varanasi, 2016

- *śāṅkhāyaṇ-Āraṅyakam*.ed.with an appendix on the Mahavrata by A.B.Keith, The Royal Asiatic Society,London, 1908
- *Śuklayajurveda- Saṁhitā*. with the Mantra-Bhāṣya of Uvaṭācārya, The Vedadīpa-Bhāṣya of Mahīdhara and Tattvabodhini hindi commentary Dr. Ramakrishna Shastri, ed.Vāsudeva Lakṣmaṇa Śāstrī Paṇaśīkara, Chowkhamba Vidyabhawan, Varanasi, 2015
- *Taittirīya Saṁhitā*(vol 4, part 2). With the padapatha and the commentaries of Bhaṭṭa Bhāskara Miśra and Sāyaṇācārya, ed. N.S.Sontakke, T.N.Dharmadhikari, Vaidika Samsodhana Mandala, Pune, 2010


——